2024 TPJ | VOLUME 2, ISSUE 2
April - June | ISSN – 2584- 0517

# विश्वस्यात्मा वेदाः

**डॉ.सुधाकरकुमारपाण्डेयः**

सहायकाचार्यः,वेदः, केन्द्रीयसंस्कृतविश्वविद्यालयः, जयपुरपरिसरः

**प्रस्तावना**

वेदो न केवलं भारतवर्षस्यापितु सर्वेषां विश्वमानवानाङ्कृते ज्ञानस्य स्रोतो वर्तते। विद्धातोर्वेदशब्दो निष्पद्यते, यस्यार्थो भवति ज्ञानप्राप्तिः। यावज्जना: सम्यक्तया वेदं न जानन्ति, तावत् अन्यद् ज्ञानं परिपूर्णं न भवति। वेदो ज्ञानस्य पर्यायवाची वर्तते। वेदस्य महिमा संसारेऽधिको वर्तते। चत्वारो वेदा: सन्ति। ते संस्कृते: मूलाधारा:, ज्ञानराशय:, धर्ममूलाश्च वर्तन्ते। वेदवाक्यानि स्वत: प्रमाणानि सन्ति। अनादय:, अपौरुषेया: च सन्ति। अतो वेदा: ब्रह्मस्वरूपा: वर्तन्ते। ऋग्वेदे १०५५२ मन्त्रा: सन्ति। ऋग्वेदस्य लक्ष्यमस्ति मनुष्येभ्य: ज्ञानप्रदानम्। यजुर्वेदे १९७५ मन्त्रा: सन्ति। ते उत्तमकर्माणि प्रति मानवान् प्रेरयन्ति। सामवेदे १८७५ मन्त्रा: सन्ति, येषु स्मरणम् ईश्वरस्य साधनावर्णनञ्च विद्येते। अथर्ववेदस्य विषयो योगो वर्तते। ''अथर्व'' शब्दस्य शब्दिकोऽर्थ: एकाग्रता वर्तते। वेदेऽस्मिन् ५९७७ मन्त्रा: वर्तन्ते, तेषु मन्त्रेषु राष्ट्रधर्म:, समाजव्यवस्था, गृहस्थधर्म:, अध्यात्मवाद:, प्रकृतिवर्णनम्, व्यावहारिकज्ञानञ्च समाहितं वर्तते। वेदवाक्यानि राष्ट्रप्रेम्णो देशसेवाया: उत्सर्गस्य च प्रेरकाणि वर्तन्ते। अतो वेदा: आर्याणां सर्वप्रधाना: सर्वमान्या धार्मिकग्रन्थाश्च वर्तन्ते। एतस्मात्कारणादेव वेदानामद्यापि राष्ट्रव्यापी प्रचारो वर्तते। अस्मद्देवालयेषु तीर्थस्थलेषु चाद्यापि तेषां प्रभावोऽक्षुण्णो वर्तते। वेदेष्वस्माकं गौरवपूर्णं महिमानं दृष्ट्वाद्यापि स्वशिरो गर्वोन्नतं कर्तुं शक्नुमो वयम्।

**उद्देश्य –**

- संक्षेपेण वेदस्वरूपस्यावबोधनम् ।
- वेदमहत्त्वस्य प्रतिपादनम् ।
- एकात्मतासूत्राणां महत्त्वस्य प्रतिपादनम् ।
- वेदाः सर्वेषां मानवानां कृते – इत्यस्य प्रबोधनम् ।
- वेदे वैदिकसंस्कृतौ च प्रवर्तनम् ।
- वेदस्य विश्वात्मतायाः साधनम्।

2024 TPJ | VOLUME 2, ISSUE 2
April - June | ISSN – 2584- 0517

**वेदेषु राष्ट्रभावना –**

वेदेषु स्वराष्ट्रस्योन्नतये विकासाय च वेदस्य महत्त्वपूर्णभूमिका वर्तन्ते। उक्तञ्च—

**स्वायुधं स्ववसं सुनीथं चतु: समुद्र: धरुणं रयीणाम्।**

**चर्वृत्यं शस्यं भूरवारमस्मभ्यं चित्रं वृषणं रयिं दा:॥**[1]

हे प्रभो! धनधान्ययुक्तां सन्ततितमस्मभ्यं प्रददातु। ता: सन्ततय: उत्तमा: भवेयु:, स्वस्य स्वराष्ट्रस्य रक्षाया: च कृते समर्था: भवेयु:। न्याय-दया-दाक्षिण्य सदाचारयुक्ता: जनसमूहनेतृत्वक्षमा: भवेयु:। परोपकारकरणायाहर्निशं तत्परा: भवेयु:, प्रशंसनीयकार्येषु संलग्ना: भवेयु:, लोकप्रियैरद्भुतगुणैश्च सम्पन्ना तथा समाजे कल्याणप्रदकार्यकारणे दक्षा: भवेयु:।

**आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूर इषव्यो ऽतिव्याधी महारथो जायतान्दोग्ध्री धेनुर्वोढनड्वानाशुः सप्तिः पुरन्ध्रिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतान्निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥**[2]

हे ब्रह्मन्, राष्ट्रेऽस्मद्देशे ब्रह्मवर्चसी यज्ञाध्ययनशीलो ब्राह्मणः आजायतामुत्पद्यताम् । राजन्यः क्षत्रियश्चेद्दश आजायताम् । कीदृशः । शूरः पराक्रमी । 'शूर विक्रान्ती' शूरयति शूरः इषव्यः इषुभिः विध्यतीति इषव्यः। यद्वा इषौ कुशलः इषव्यः। अतिव्याधी अत्यन्तं विध्यतीत्यतिव्याधी शत्रुभेदनशीलः। महारथः एकः सहस्रं यजति स महारथः । दोग्ध्री दुग्धपूरयित्री धेनुः आजायतां राष्ट्र इति सर्वत्र सम्बन्धः । अनड्वान् वृषभो वोढा वहनशीलो जायताम् । सप्तिरश्व आशुः शीघ्रगामी जायताम् । योषा स्त्री पुरन्धिः पुरं शरीरं सर्वगुणसंपन्नं दधाति पुरन्धिः। रथे तिष्ठतीति रथेष्टाः क्विप् सप्तम्या अलुक्। रथे स्थितो युयु- दिशे स्वा त्सुर्नरो जिष्णुः जयनशीलो जायताम् । युवा आ अस्येति पदच्छेदः । अस्य यजमानस्य युवा समर्थः सभेयः सभायां योग्यो वीरः पुत्रो जायताम् । सभायां साधुः सभेयः 'ढच्छन्दसि' (पा० ४ । ४ । १०६ ) इति सभाशब्दात्तत्र साधुरित्यर्थे ढ प्रत्ययः । तस्य ण्यादेशः। किंच नोऽस्माकं राष्ट्रे पर्जन्यो निकामे निकामे नितरां कामनायां सत्यां वर्षतु । अभ्यासो वीप्सार्थः । नोऽस्माकं राष्ट्रे ओषधयः यवाद्याः फलवत्यः फलयुक्ताः पच्यन्तां स्वयमेव पक्का भवन्तु । नोऽस्माकं योगक्षेमः कल्पतां योगेन युक्तः क्षेमो योगक्षेमः स क्लृप्तो भवतु। अलब्धलाभो योगः । लब्धस्य परिपालनं क्षेमः ॥

[1] ऋग्वेद ''इन्द्रसूक्त'' १०/४७/२।

[2] वा.सं.-२२-२२

2024 TPJ | VOLUME 2, ISSUE 2
April - June | ISSN – 2584- 0517

एतादृशी भावना वेदस्य वर्तते। इदं ज्ञानं सर्वेषां कृते वर्तते। न केवलं एकस्य धर्मस्य, जातेः, सम्प्रदायस्यापितु मानवानां कृते वर्तते। सर्वे मानवा इच्छन्ति उक्तञ्च —

**वेदस्य सार्वभौमं सत्यम् (Universal truth of veda) –**

**भद्रं कर्णेभि: श्रृणुयाम देवा भद्रं पश्ये मा क्षभिर्जजत्रा:।**
**स्थिरैरङ्गैस्तुष्टुवां ँ सस्तनुभिर्व्यशेमहि देवहितं यदायुः ॥**[3]

मन्त्रेऽस्मिन् सर्वेषाङ्कृते समानरूपेण कार्यकरणाय प्रेरणा प्रदत्ता वर्तते। मन्त्र: कथयति यत् - कर्णद्वारा भद्रं कल्याणकरमेव वयं सर्वदा श्रृणुयाम। अस्माकं दृष्टिरपि सर्वेषां कृते पक्षपातरहिता शोभना च वर्तताम्। अस्माकं हस्तौ वृद्धजनानाम्, असक्तजनानां, ग्रामस्य, नगरस्य देशस्य सेवाकरणाय सर्वदा तत्परौ भवेताम्। अस्मत्पादौ सर्वदा तीर्थस्थलेषु गमनाय, देशरक्षार्थम्, जनसहयोगस्य कृते तेषां समक्षं गमनाय, विपत्तौ सर्वेषां समक्षं शीघ्रं गमनार्थञ्च सदैव तत्परो भवेताम्। इदं शरीरमपि असहायानां सहयोगार्थं सदैव तत्परं भवेत्। मनसा, वाचा, कर्मणा च पृथिव्याम् आकाशे, वायमुण्डले ये व्यक्ताव्यक्तरूपेण विराजमाना जीवाः सन्ति, तेषां सर्वदा शिवं भूयात् इयमेव कामना वेदानां वर्तते। हिन्दुशास्त्राणां प्रादुर्भावो वेदेभ्य एवं सञ्जात:।

अस्माकं शास्त्राणि कदापि केवलं हिन्दूनामेव समुद्धारार्थं मधुराणि भाषणानि वचनानि वा न कथयन्ति, अपितु सर्वेषां प्राणिनां हितार्थमियं परम्परा केवलमस्माकं वेदाश्रितसनातनधर्मे एव अनादिकालात् प्रचलन्ती वर्तते। सनातनधर्मेतरधर्मसम्प्रदायाश्च केवलं स्वसम्प्रदायस्य, जातेः, धर्मस्य वा चर्चां कुर्वन्ति। कुराणे केवलं मुस्लिमानां चर्चा वर्तते, बाइबिले क्रिश्चियानाङ्कृतेऽनेकेषां नियमानां चर्चा दरीदृश्यते। तथैवेवमेवान्येऽपि बहव: सम्प्रदाया: स्वस्वजातीनां चर्चां कुर्वन्ति, परन्तु सनातनसंस्कृति: अथवा हिन्दुसंस्कृतिर्यादृशीं दृष्टिं स्वधर्मानुचरणपरायणानां कृते धारयति तथैव सर्वमनुष्याणां कल्याणं कामयते। सनातनधर्मस्य मुख्यसमुद्घोषो वर्तते यत् —

**सर्वे भवन्तु सुखिन: सर्वे सन्तु निरामया:।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दु:खभाग् भवेत् ॥**[4]

अस्य श्लोकस्य तात्पर्यं किमस्ति? अस्माकं यदि वेदादिशास्त्राणि केवलं हिन्दूनां विषये चर्चां कुर्वन्ति चेत् उपर्युक्ते श्लोके सर्व इति कथनस्य का आवश्यकता? किमर्थं बहुवचनस्य प्रयोग: कृत:? किमर्थं हिन्दवो भवन्तु सुखि न इति न कृतम्? अत: सर्व इति पद-पदे विज्ञायते

[3] वा.सं.-२५.२१

[4] वैदिकवाक्य।

2024 TPJ | VOLUME 2, ISSUE 2
April - June | ISSN – 2584- 0517

यद् - अस्माकं दृष्टौ प्राणिनः समानरूपेण पृथिव्यां वर्तन्ते। सर्वेषां शरीरे रक्तसञ्चारस्य प्रक्रिया चलति। रक्तस्य वर्णोऽपि समान एव भवति। अतोऽनेनैव व्यवहारेण ज्ञायते यद् अन्यमार्गेभ्यो वैदिकपन्था भिन्नो वर्तते। वास्तविकरूपेण वेदेषु एकरूपतायाः सर्वत्र प्रदर्शनमपि भवति। यत्र प्रतिबन्धो न्यूनो भवति, तत्रैव जनानां बुद्धीनां स्फोरणमपि सम्यक्तया झटिति भवति। वेदस्य महत्त्वं विज्ञाय मैक्समूलरेण वेदानां स्वभाषायामनुवादो विहितः। अन्येऽपि बहवः पाश्चात्य-वैज्ञानिकाः अस्माकं वेदसंरक्षितां संस्कृतिं प्रति सन्निकृष्टाः जाताः। तैः स्वदेशे भारतीयसंस्कृतेश्च अत्यधिकं प्रचारप्रसारौ च कृतौ। यदि वेदसंरक्षितायां संस्कृतौ एकतायाः भावना नाभविष्याच्चेत् तेऽपि पाश्चात्यदार्शनिकाः मानवाश्च भारतीयसंस्कृतिं प्रति आकृष्टाः नाभविष्यन्। वेदेषु राष्ट्रस्य, देशस्य, विश्वस्य च स्पष्टकल्पना वर्तते। राष्ट्रस्योन्नतिः, राष्ट्रस्य सुरक्षा, राष्ट्रस्य सञ्चालनं, राष्ट्रीयभावनायाश्च समुल्लेखो वेदस्य नैकेषु मन्त्रेषु वर्तन्ते। वेदस्य दृष्टौ सर्वे पवित्रा जनाः सन्ति। अर्थात् समानरूपेण वर्तन्ते। उक्तञ्च—

**विश्वशान्तेः कामना (Peacefully Environment in world) -**

**“द्यौः शान्तिरन्तरिक्ष ँ् शान्तिः पृथिवी शान्तिरापः शान्तिरोषधशान्ति-र्वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वं ँ् शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि।।”**[5]

मन्त्रेऽस्मिन् सर्वेषां पदार्थानां कृते शं भूयादिति प्रार्थना कृता। पृथिव्याः, जलस्य, वनस्पतेरन्तरिक्षस्यापि कल्याणार्थं वेदेन प्रार्थितम्। वेदेन कस्यापि पदार्थस्य विषये भेददृष्टिर्न कृता। समानरूपेण सर्वेषामुपरि दृष्टिपातः कृतः। एकरूपता वेदस्य सर्वेषु भागेषु दृश्यते। “सर्वाणि कार्याणि अस्माभिः सर्वैः मानवैः मिलित्वा करणीयानि इति” इति वेदेन कथितं वर्तते।

**वेदे सहयोगस्य भावना-**

**सह नाववतु सह नौ भुनक्तु**
**सहवीर्यङ्करवावहै।**
**तेजस्वि नावधीतमस्तु मा विद्विषावहै॥**[6]

अस्माभिः, सर्वैः सहैव गन्तव्यम्, पठितव्यम्, करणीयम्, भोक्तव्यञ्च भावनेयमस्माकं वेदस्य वर्तते। सर्वत्र एकताया भावना दृश्यते। एकतायाः उदात्तभावनात्यधिकरूपेण समाविष्टा वर्तन्ते। उक्तञ्च—

**सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्।**
**देवा भागं यथा पूर्वे सञ्जानानाम् उपासते॥**[7]

[5] शुक्लयजुर्वेद ३६/१७।

[6] कठोपनिषद् “शान्तिपाठ”।

[7] ऋग्वेद १०/१९१/२।

2024 TPJ | VOLUME 2, ISSUE 2
April - June | ISSN – 2584- 0517

हे जगदीश्वर! वयं सर्वे सहैव गच्छेम, वदेम, चलेम, हसेम, जानीमहि इत्यादीनि वाक्यानि वेदेषु एव भवन्ति। वेदानां दृष्टौ सर्वे मानवाः समाना वर्तन्ते, तत्र भेदो नास्ति। येन ग्रन्थेन धर्मस्य, अर्थस्य, कामस्य, मोक्षस्य, पुरुषार्थस्य च ज्ञानं भवति, तस्यैव नाम वेदो वर्तते— **''विद्यन्ते ज्ञायन्ते लभ्यन्ते एभिर्धर्मादिपुरुषार्था इति वेदाः।''**[8]सायणाचार्येण वेदस्यार्थः कृतो यत्

— **''इष्टप्राप्त्यनिष्ट-परिहारयोरलौकिकम् उपायं यो ग्रन्थो वेदयति, स वेदः''**[9]। वेदस्य कृते सर्वज्ञानमयः इति मनुना कथितम् —

**यः कश्चित् कस्यचिद् धर्मो मनुना परिकीर्तितः।**
**स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः॥**[10]

वेदेषु भौतिक-रसायनशास्त्र-वनस्पतिशास्त्र-जन्तुविज्ञान-गणितशास्त्र-पर्यावरण-वृष्टिविज्ञान-भूगर्भविज्ञान-आयुर्वेदादीनां सहस्राधिका मन्त्राः विद्यमानाः सन्ति। वेदेषु सामाजिकमहत्त्वस्य, आर्थिकमहत्त्वस्य राजनीतिकमहत्त्वस्य, ऐतिहासिकमहत्त्वस्य, भाषावैज्ञानिकमहत्त्वस्य च वर्णनं सुन्दरं सरलतया च प्रतिपादितं वर्तते। महर्षिणा पतञ्जलिना अपि महाभाष्यस्य प्रारंभे ब्राह्मणस्य वेदाध्ययनमेव तपः, परमकर्तव्यं च वर्तते। निःस्वार्थभावेन वेदाङ्गानामपि अध्यनं परमावश्यकं वर्तते। उक्तञ्च—

**ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च।**[11]

मनुनापि मनुस्मृतौ वेदाध्ययनस्य कृते इदमेव कथितम्। यैर्ब्राह्मणकुलं संप्राप्यापि पवित्रो ग्रन्थो वेदो नाधीयते, तेषां जीवनं व्यर्थं वर्तते। ते जना जीवन्त एव पतिता भवन्ति, जगति सम्मानार्हा न भवन्ति। उक्तञ्च—

**वेदमेव सदाऽभ्यस्येत् तपस्तप्यन् द्विजोत्तमः।**
**वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते॥**[12]

**योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।**
**स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः॥**[13]

**निष्कर्षः-**

सर्वाणि ज्ञानानि वेदसम्बद्धानि सन्ति। सर्वैः शास्त्रैर्वेदस्यैव वर्णनं क्रियते। आयुर्वेदस्य, धनुर्वेदस्य, आर्थिकस्य, सामाजिकस्य, एकात्मतायाः, विश्वबन्धुत्वभावनायाश्च प्रदर्शनमथवा वर्णनं सर्वेषु वेदेषु दृश्यते। वेदाः न केवलं भारतीयसंस्कृतेरपितु विश्वस्य आत्मा वर्तते।वेदं विना विश्वस्य जीवनं न संभवति।इदानीं समग्रं विश्वं कालमुखे प्रविष्टमिव वर्तते। तृतीयविश्वयुद्धं प्रारब्धमिव वर्तते। इदं

[8] विष्णुमित्रः

[9] ऐतरेय भाष्यभूमिकायाम्।

[10] मनुस्मृतिः २/६।

[11] महाभाष्य आह्निक १।

[12] मनुस्मृतिः २/१६६।

[13] मनुस्मृतिः २/१६८।

2024 TPJ | VOLUME 2, ISSUE 2
April - June | ISSN – 2584- 0517

वेदज्ञानस्य फलम् **सर्वं खल्विदं ब्रह्म**[14] इति वेदान्तस्य समुद्घोष एव विश्वं रक्षितुं प्रभवति। आत्मानं विना शरीरमिव वेदज्ञानं विना विश्वम्। ज्ञानानां जनको वेद एव वर्तते। वेदद्वारैव विश्वस्मिन् एकात्मतायाः प्रचारप्रसारौ सर्वत्र दृश्येते। अतो वेदानाम् अध्ययनार्थं सर्वैर्यतनीयम्। केन माध्यमेन अस्या रक्षा भवति। तस्योपायस्यापि चिन्तनं कर्तव्यम्।

**शोधप्रविधिः –**

प्रस्तुतोऽस्मिन् शोधपत्रेऽस्मिन् विवरणात्मको शोधप्रविधिः वर्तते।

**सन्दर्भग्रन्थसूची-**


- अथर्ववेदसंहिता - पं. रामस्वरूपशर्मागौडः,विद्याभवन,वाराणसी,१९९७ ।
- ईशावास्योपनिषद्- शशि तिवारी, भारती विद्या प्रकाशन, नई दिल्ली ,१९९७ ।
- ऋग्वेदसंहिता - सम्पादकः - वा.ना. लक्ष्मीकान्त शर्मा द्विवेदी ,श्रीजगद्गुरु-
- श्रीकाञ्चीकामकोटिपीठद्वारा प्रकाशिता ,काञ्चीपुरम् ,१९७९।
- कठोपनिषद् - शाङ्करभाष्यम्,मोतीलाल बनारसीदास ,बनारस, २००० ।
- महाभारतम्-सम्पादकः- रामनारायणशास्त्री,मोतीलालबनारसीदास, वाराणसी,१९६६।
- यजुर्वेदसंहिता-भाष्यकारः- श्रीपाददामोदरसातवलेकर-स्वाध्याय मण्डल,पारडी, १९८५।
- वैदिक-वाङ्मय का बृहद् इतिहास- (वेद-खण्ड)- पद्मभूषण आचार्य बलदेव उपाध्याय, उत्तरप्रदेश संस्कृत संस्थान,लखनऊ, १९९९।
- वैदिक साहित्य और संस्कृति - डॉ. कपिल द्विवेदी,विश्वविद्यालय प्रकाशन,वाराणसी,२०१०।
- वैदिकवाङ्मयस्येतिहासः - आचार्य जगदीशचन्द्रमिश्रः, चौखम्बा सुरभारती प्रकाशन,वाराणसी ,१९८९।
- शतपथब्राह्मणम्- सायणभाष्यसहितम्, सम्पादकः- श्रीयुगलकिशोरमिश्रः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,वाराणसी,२००४,।
- श्रीमद्भगवद्गीताधर्म-दर्शनभाष्यम्- डॉ.गिरधारी लाल चतुर्वेदी, वृजरानी पब्लिकेशन ,मथुरा,१९९९।


[14] छान्दोग्योपनिषद्